# Panchalikritam Krishnaya Kauravanam Durvyavaharam Nivedanam

# પાઞ્ચાલિકૃતં કૃષ્ણાય કૌરવાણાં દુર્વ્યવહારં નિવેદનમ્

## Document Information

Text title : Panchalikritam Krishnaya Kauravanam Durvyavaharam Nivedanam

File name : pAnchAlikRRitaMkRRiShNAyakauravANAMdurvyavahAraMnivedanam.itx

Category : misc, mahAbhArata

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | AraNyakaparva | adhyAya 13/43-52||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# પાઞ્ચાલિકૃતં કૃષ્ણાય કૌરવાણાં દુર્વ્યવહારં નિવેદનમ્

પાઞ્ચાલી પુણ્ડરીકાક્ષમાસીનં યાદવૈઃ સહ
અભિગમ્યાબ્રવીત્કૃષ્ણા શરણ્યં શરણૈષિણી ॥ ૪૨॥

પૂર્વે પ્રજાનિસર્ગે ત્વામાહુરેકં પ્રજાપતિમ્ ।
સ્રષ્ટારં સર્વભૂતાનામસિતો દેવલોઽબ્રવીત્ ॥ ૪૩॥

વિષ્ણુસ્ત્વમસિ દુર્ધર્ષ ત્વં યજ્ઞો મધુસૂદન ।
યષ્ટા ત્વમસિ યષ્ટવ્યો જામદગ્ન્યો યથાબ્રવીત્ ॥ ૪૪॥

ઋષયસ્ત્વાં ક્ષમામાહુઃ સત્યં ચ પુરુષોત્તમ ।
સત્યાદ્યજ્ઞોઽસિ સમ્ભૂતઃ કશ્યપસ્ત્વાં યથાબ્રવીત્ ॥ ૪૫॥

સાધ્યાનામપિ દેવાનાં વસૂનામીશ્વરેશ્વરઃ ।
લોકભાવન લોકેશ યથા ત્વાં નારદોઽબ્રવીત્ ॥ ૪૬॥

દિવં તે શિરસા વ્યાપ્તં પદ્ભ્યાં ચ પૃથિવી વિભો ।
જઠરં તે ઇમે લોકાઃ પુરુષોઽસિ સનાતનઃ ॥ ૪૭॥

વિદ્યાતપોઽભિતપ્તાનાં તપસા ભાવિતાત્મનામ્ ।
આત્મદર્શનસિદ્ધાનામૃષીણામૃષિસત્તમ ॥ ૪૮॥

રાજર્ષીણાં પુણ્યકૃતામાહવેષ્વનિવર્તિનામ્ ।
સર્વધર્મોપપન્નાનાં ત્વં ગતિઃ પુરુષોત્તમ ॥ ૪૯॥

ત્વં પ્રભુસ્ત્વં વિભુસ્ત્વં ભૂરાત્મભૂસ્ત્વં સનાતનઃ
લોકપાલાશ્ચ લોકાશ્ચ નક્ષત્રાણિ દિશો દશ
નભશ્ચન્દ્રશ્ચ સૂર્યશ્ચ ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૫૦॥

મર્ત્યતા ચૈવ ભૂતાનામમરત્વં દિવૌકસામ્ ।
ત્વયિ સર્વં મહાબાહો લોકકાર્યં પ્રતિષ્ઠિતમ્ ॥ ૫૧॥

સા તેઽહં દુઃખમાખ્યાસ્યે પ્રણયાન્મધુસૂદન ।

ઈશસ્ત્વં સર્વભૂતાનાં યે દિવ્યા યે ચ માનુષાઃ ॥ ૫૨॥

કથં નુ ભાર્યા પાર્થાનાં તવ કૃષ્ણ સખી વિભો ।
ધૃષ્ટદ્યુમ્નસ્ય ભગિની સભાં કૃષ્યેત માદૃશી ॥ ૫૩॥

સ્ત્રીધર્મિણી વેપમાના રુધિરેણ સમુક્ષિતા ।
એકવસ્ત્રા વિકૃષ્ટાસ્મિ દુઃખિતા કુરુસંસદિ ॥ ૫૪॥

રાજમધ્યે સભાયાં તુ રજસાભિસમીરિતામ્ ।
દૃષ્ટ્વા ચ માં ધાર્તરાષ્ટ્રાઃ પ્રાહસન્પાપચેતસઃ ॥ ૫૫॥

દાસીભાવેન ભોક્તું મામીષુસ્તે મધુસૂદન ।
જીવત્સુ પાણ્ડુપુત્રેષુ પાઞ્ચાલેષ્વથ વૃષ્ણિષુ ॥ ૫૬॥

નન્વહં કૃષ્ણ ભીષ્મસ્ય ધૃતરાષ્ટ્રસ્ય ચોભયોઃ ।
સ્નુષા ભવામિ ધર્મેણ સાહં દાસીકૃતા બલાત્ ॥ ૫૭॥

ગર્હયે પાણ્ડવાંસ્ત્વેવ યુધિ શ્રેષ્ઠાન્મહાબલાન્ ।
યે ક્લિશ્યમાનાં પ્રેક્ષન્તે ધર્મપત્નીં યશસ્વિનીમ્ ॥ ૫૮॥

ધિગ્બલં ભીમસેનસ્ય ધિક્પાર્થસ્ય ધનુષ્મતામ્ ।
યૌ માં વિપ્રકૃતાં ક્ષુદ્રૈર્મર્ષયેતાં જનાર્દન ॥ ૫૯॥

શાશ્વતોઽયં ધર્મપથઃ સદ્ભિરાચરિતઃ સદા ।
યદ્ભાર્યાં પરિરક્ષન્તિ ભર્તારોઽલ્પબલા અપિ ॥ ૬૦॥

ભાર્યાયાં રક્ષ્યમાણાયાં પ્રજા ભવતિ રક્ષિતા ।
પ્રજાયાં રક્ષ્યમાણાયામાત્મા ભવતિ રક્ષિતઃ ॥ ૬૧॥

આત્મા હિ જાયતે તસ્યાં તસ્માજ્જાયા ભવત્યુત ।
ભર્તા ચ ભાર્યયા રક્ષ્યઃ કથં જાયાન્મમોદરે ॥ ૬૨॥

નન્વિમે શરણં પ્રાપ્તાન્ન ત્યજન્તિ કદાચન ।
તે માં શરણમાપન્નાં નાન્વપદ્યન્ત પાણ્ડવાઃ ॥ ૬૩॥

પઞ્ચેમે પઞ્ચભિર્જાતાઃ કુમારાશ્ચામિતૌજસઃ ।
એતેષામપ્યવેક્ષાર્થં ત્રાતવ્યાસ્મિ જનાર્દન ॥ ૬૪॥

પ્રતિવિન્ધ્યો યુધિષ્ઠિરાત્સુતસોમો વૃકોદરાત્ ।
અર્જુનાચ્છ્રુતકીર્તિસ્તુ શતાનીકસ્તુ નાકુલિઃ ॥ ૬૫॥

કનિષ્ઠાચ્છ્રુતકર્મા તુ સર્વે સત્યપરાક્રમાઃ ।
પ્રદ્યુમ્નો યાદૃશઃ કૃષ્ણ તાદૃશાસ્તે મહારથાઃ ॥ ૬૬॥

નન્વિમે ધનુષિ શ્રેષ્ઠા અજેયા યુધિ શાત્રવૈઃ ।
કિમર્થં ધાર્તરાષ્ટ્રાણાં સહન્તે દુર્બલીયસામ્ ॥ ૬૭॥

અધર્મેણ હૃતં રાજ્યં સર્વે દાસાઃ કૃતાસ્તથા ।
સભાયાં પરિકૃષ્ટાહમેકવસ્ત્રા રજસ્વલા ॥ ૬૮॥

નાધિજ્યમપિ યચ્છક્યં કર્તુમન્યેન ગાણ્ડિવમ્ ।
અન્યત્રાર્જુનભીમાભ્યાં ત્વયા વા મધુસૂદન ॥ ૬૯॥

ધિગ્ભીમસેનસ્ય બલં ધિક્પાર્થસ્ય ચ ગાણ્ડિવમ્ ।
યત્ર દુર્યોધનઃ કૃષ્ણ મુહૂર્તમપિ જીવતિ ॥ ૭૦॥

ય એતાનાક્ષિપદ્રાષ્ટ્રાત્સહ માત્રાવિહિંસકાન્ ।
અધીયાનાન્પુરા બાલાન્વ્રતસ્થાન્મધુસૂદન ॥ ૭૧॥

ભોજને ભીમસેનસ્ય પાપઃ પ્રાક્ષેપયદ્વિષમ્ ।
કાલકૂટં નવં તીક્ષ્ણં સમ્ભૃતં લોમહર્ષણમ્ ॥ ૭૨॥

તજ્જીર્ણમવિકારેણ સહાન્નેન જનાર્દન ।
સશેષત્વાન્મહાબાહો ભીમસ્ય પુરુષોત્તમ ॥ ૭૩॥

ઇતિ મહાભારતે આરણ્યપર્વણિ ૧૩ અધ્યાયાન્તર્ગતં
પાઞ્ચાલિકૃતં કૃષ્ણાય કૌરવાણાં દુર્વ્યવહારં પ્રતિ નિવેદનં સમ્પૂર્ણમ્ ।

મહાભારત । આરણ્યકપર્વ । અધ્યાય ૧૩/૪૩-૫૨॥

mahAbhArata . AraNyakaparva . adhyAya 13/43-52..

Proofread by PSA Easwaran

*Panchalikritam Krishnaya Kauravanam Durvyavaharam Nivedanam*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*